শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে সপ্তপঞ্চাশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে সপ্তপঞ্চাশং দশকম্॥

## প্রলম্বাসুরৱধৱর্ণনম্

রামসখঃ ক্কাপি দিনে
কামদ ভগৱন্ গতো ভৱান্ ৱিপিনম্।
সূনুভিরপি গোপানাং
ধেনুভিরভিসংৱৃতো লসদ্বেষঃ॥ **57.1** ॥

সন্দর্শযন্ বলায
স্বৈরং ৱৃন্দাৱনশ্রিযং ৱিমলাম্।
কাণ্ডীরৈঃ সহ বালৈ -
র্ভাণ্ডীরকমাগমো ৱটং ক্রীডন্॥ **57.2** ॥

তাৱত্তাৱকনিধন -
স্পৃহযালুর্গোপমূর্তিরদযালুঃ।
দৈত্যঃ প্রলম্বনামা
প্রলম্ববাহুং ভৱন্তমাপেদে॥ **57.3** ॥

জানন্নপ্যৱিজান -
ন্নিৱ তেন সমং নিবদ্ধসৌহার্দঃ।
ৱটনিকটে পটুপশুপ -
ৱ্যাবদ্ধং দ্বন্দ্বযুদ্ধমারব্ধাঃ॥ **57.4** ॥

গোপান্ ৱিভজ্য তন্বন্
সঙ্ঘং বলভদ্রকং ভৱৎকমপি।

ৎৱদ্বলভীরুং দৈত্যং
   ৎৱদ্বলগতমন্ৱমন্যথা ভগৱন্॥ **57.5** ॥

কল্পিতৱিজেতৃৱহনে
   সমরে পরযূথগং স্বদযিততরম্।
শ্রীদামানমধত্থাঃ
   পরাজিতো ভক্তদাসতাং প্রথযন্॥ **57.6** ॥

এৱং বহুষু ৱিভূমন্
   বালেষু ৱহৎসু ৱাহ্যমানেষু।
রামৱিজিতঃ প্রলম্বো
   জহার তং দূরতো ভৱদ্ভীত্যা॥ **57.7** ॥

ৎৱদ্দূরং গমযন্তং
   তং দৃষ্টৱা হলিনি ৱিহিতগরিমভরে।
দৈত্যঃ স্বরূপমাগা -
   দ্যদ্রূপাৎ স হি বলোঽপি চকিতোঽভূৎ॥ **57.8** ॥

উচ্চতযা দৈত্যতনো -
   স্ত্বন্মুখমালোক্য দূরতো রামঃ।
ৱিগতভযো দৃঢমুষ্ট্যা
   ভৃশদুষ্টং সপদি পিষ্টৱানেনম্॥ **57.9** ॥

হৎৱা দানৱৱীরং
   প্রাপ্তং বলমালিলিঙ্গিথ প্রেম্ণা।
তাৱন্মিলতোর্যুৱযোঃ
   শিরসি কৃতা পুষ্পৱৃষ্টিরমরগণৈঃ॥ **57.10** ॥

আলম্বো ভুৱনানাং
   প্রালম্বং নিধনমেৱমারচযন্।

কালং ৱিহায সদ্যো
লোলম্বরুচে হরে হরেঃ ক্লেশান্ ॥ **57.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে সপ্তপঞ্চাশং দশকং সমাপ্তম্ ॥